निर्देशः– (i) सभी प्रश्न करने अनिवार्य हैं।

(ii) स्पष्ट व सुन्दर लेख अपेक्षित है।

(iii) प्रश्न संख्या व खण्ड संख्या क्रम से अवश्य लिखिए।

## खण्डः 'क' (अपठित अवबोधनम्)

**प्र०1. अधोलिखितान् गद्यांशान् पठित्वा प्रश्नान् उत्तरत।** **(10)**

१९१९ तमे वर्षे अप्रैलमासस्य १३ तारिकायां वैशाखीपर्वणः दिवसः भारतस्य स्वतन्त्रतायाः इतिहासे विशेषं महत्वं स्थापयति। अस्मिन् पुनीते दिवसे स्वतन्त्रताभिलाषिभिः जलियाँ–वाला नामके उद्याने स्वोपरि गोलिकानां वर्षाः सोढ़ाः। तस्मिन् दिने नर–पिशाचेन जनरलडायरनाम्ना आंग्लशासनाधिकारिणां सहस्त्राः नागरिकाः मशीनगनैः प्रदग्धाः। शिशवः स्त्रियश्च पादैः केशैः च गृहीत्वा पृथ्वीतले आकर्षिताः सहस्त्राः बालकाः अनाथाः संजाताः सहस्त्राणां मातृणां क्रीडानि रिक्तानि। क्षतविक्षताः नराः नार्यश्च जलबिन्दूनाम भावे दीर्घं दीर्घं निःश्वस्य मृताः। अबलाः गर्भवत्यश्च नार्यः उदरेण चलितुं विवशीकृताः। एतेषाम् अत्याचाराणां प्रतिशोधः पश्चाद् उधमसिंहनामकेन सिखयुवकेन जनरलडायरं हत्वा कृतः।

**I. एकपेदन उत्तरत।** **(2)**

(i) कस्य पर्वणः दिवसः भारतस्य स्वतन्त्रतायाः इतिहासे विशेषं महत्वं स्थापयति?

(ii) स्वतन्त्रताभिलाषिभिः कस्मिन् उद्याने स्वोपरि गोलिकानां वर्षाः सोढ़ाः?

**II. पूर्णवाक्येन उत्तरत।** **(2)**

(i) एतेषाम् अत्याचाराणां प्रतिशोधं केन कथं कृतः?

(ii) वैशाखीपर्वणः दिवसः कस्य इतिहासे विशेषं महत्वं स्थापयति?

**III. भाषिककार्यम्।** **(4)**

(i) 'पवित्र दिने' इत्यत्र पवित्रे इत्यर्थे अत्र कः पर्यायः प्रयुक्तः?

(क) पुनीते (ख) दिवसे (ग) पुनीते दिवसे (घ) पवित्रे

(ii) 'तस्मिन् दिने' अत्र 'तस्मिन्' इति सर्वनामपदं कस्याः तारिकायाः कृते प्रयुक्तम्?

(क) 19 तारिकायाम् (ख) 13 तारिकायाम् (ग) 15 तारिकायाम् (घ) 26 तारिकायाम्

(iii) 'गर्भवत्यश्च नार्यश्च' एतत्कृते किं विशेषणं गद्यांशे प्रयुक्तम्?

(क) अबला (ख) नार्यः (ग) गर्भवत्यः (घ) निःश्वस्य

(iv) 'निःश्वस्य' इति पदे कः प्रत्ययः प्रयुक्तः?

(क) ल्युट् (ख) ण्यत् (ग) यत् (घ) ल्यप्

IV. अस्य गद्यांशस्य उचितं शीर्षकं लिखत। **(2)**

## खण्डः 'ख' (रचनात्मक कार्यम्) **(15)**

**प्र०2. स्व–विद्यालयस्य वर्णनं कुर्वन् मित्रं प्रति लिखितम् इदम् अपूर्णं पत्रं मञ्जूषातः पदानि विचित्य पूरयत।** **(5)**

**मञ्जूषाः–** लेखिष्यामि, परिश्रमिणः, शोभनः, कुशलोऽस्मि, अध्यापकाः

रामनगरम्
कुरुक्षेत्रम्
तिथिः 22-09-2017

प्रिय विकासः
सप्रेम नमस्कारः।

अहम् अत्र (i) ---------------। अहम् अधुना स्वविद्यालयस्य वर्णनं कर्तुम् इच्छामि। मम विद्यालय अतीव विशालः (ii) --------------- वातानुकूलितः च अस्ति। अस्माकं सर्वे (iii) --------------- मनोयोगेन पाठयन्ति। तेषां योग्यतां वस्तुतः प्रशंसनीया। मम विद्यालये सर्वे छात्राः अपि (iv) --------------- सन्ति। विस्तरेण पुनः (v) ---------------। मातृपितृचरणयोः प्रणामाः।

भवतः सुहृद

गोपालः

**प्र०3. अधोलिखितान् संवादान् मञ्जूषायां प्रदत्तशब्दैः पूरयन्तु।** **(5)**

**मञ्जूषाः**— वर्धते, अस्ति, पठामि, पर्यावरणस्य, अहम्

रोहितः — श्वेते! अधुना त्वं कस्यां कक्षायां पठसि?

श्वेताः — अहम् तु अष्टम् कक्षायां (i) ---------------।

रोहितः — त्वम् किं लिखसि?

श्वेताः — (ii) --------------- लेखं लिखामि।

रोहितः — कस्मिन् विषये?

श्वेताः — (iii) --------------- विषये।

रोहितः — किर्मथम्?

श्वेताः — श्वः मम विद्यालये भाषणप्रतियोगिता (iv) ---------------।

रोहितः — श्वेते! पर्यावरणस्य विषयः तु अत्युत्तमः।

श्वेताः — आम् अद्य औद्योगिकविकासः तु (v) ---------------एव।

**प्र०4. निम्नलिखित में से किसी एक विषय पर पाँच पंक्तियाँ संस्कृत में लिखिए।** **(5)**

(i) अस्माकं विद्यालयः (ii) विद्याः महिमा (iii) परोपकारः

## खण्डः 'ग' (अनुप्रयुक्त व्याकरण) **(25)**

**प्र०5. संस्कृत में गिनती लिखिए—** **(3)**

10, 20, 50

**प्र०6. अधोलिखितेषु पदेषु सन्धिं कुरुत।** **(3)**

**(i)** विद्या + आलयः = ---------------

**(ii)** गण + ईशः = ---------------

**(iii)** तथा + एव = ---------------

**प्र०7. प्रकृति—प्रत्ययान् योजयित्वा पदनिर्माणं कुरुत।** **(3)**

**(i)** हस् + क्त्वा = ---------------

**(ii)** पठ् + क्त्वा = ---------------

**(iii)** खाद् + क्त्वा = ---------------

**प्र०8. उचित धातु रुपैः रिक्तस्थानानि पूरयत।** **(4)**

| | | |
|---|---|---|
| पठतु | पठताम् | --------------- |
| गच्छति | --------------- | गच्छन्ति |
| --------------- | खादथः | खादथ |
| --------------- | पश्यावः | पश्यामः |

प्र०9. उचित शब्दरुपैः रिक्तस्थानानि पूरयन्तु। (4)

| | | |
|---|---|---|
| रामः | रामौ | ---------------- |
| मुनिम् | ---------------- | मुनीन् |
| ---------------- | मातरौ | मातरः |
| त्वम् | ---------------- | यूयम् |

प्र०10. अधोलिखितेषु वाक्येषु कोष्ठकात् उचितं पदं चित्वा रिक्तस्थानानि पूरयत। (4)

(i) सः ------------ खञ्जः अस्ति। (पादम् / पादेन / पादात्)

(ii) ------------ उभयतः वृक्षाः सन्ति। (विद्यालयम् / विद्यालयस्य)

(iii) सीता ------------ सह वनं गच्छति। (रामेण / रामस्य / रामाय)

(iv) रामः ------------ खादति। (फलम् / फले / फलात्)

प्र०11. अधोलिखितेषु पदेषु उपसर्गं चित्वा पृथक् कुरुत। (4)

(i) उपहारः = ------------ + ------------

(ii) प्रहारः = ------------ + ------------

(iii) परिश्रमः = ------------ + ------------

(iv) विजयः = ------------ + ------------

## खण्डः 'घ' (पठित अवबोधनम्) (30)

प्र०12. हिन्दीभाषायाम् अनुवादम् लिखत्। (4)

एकः आसीत् प्रेमलः एका चासीत् प्रेमली। काष्ठच्छेदेन श्रान्तः प्रेमलः सायंकाले गृहमागच्छत्, प्रेमलीं चावदत्– प्रेमलि! अद्य खलु भृशं श्रान्तोऽस्मि। मह्यम् जलम् उष्णं कृत्वा देहि। अहम् स्नात्वा तस्मिन् जले चरणौ स्थापयामि।

प्र०13. हिन्दीभाषायाम् श्लोकस्य अर्थं कुरुत। (4)

साहित्यसङ्गीतकलाविहीनः
साक्षात्पशुः पुच्छविषाणहीन,
तृणं न खादन्नपि जीवमानः
तद्भागधेयं परमं पशूनाम्।।

प्र०14. निम्नलिखितानि शब्दानाम् अर्थं लिखत्– (कोई चार) (4)

जलवाहिनी, लोमशिका, पाषाणाः, कुठारिका, जरा

प्र०15. एकपदेन उत्तरत– (4)

(क) कूपः कीदृशः अस्ति?

(ख) सिंहस्य नाम किम्?

(ग) कस्य यशः नश्यति?

(घ) गणिकायाः नाम किम्?

प्र०16. पूर्णवाक्येन उत्तरं दीयताम्– (4)

(क) खरनखरः कुत्र प्रतिवसति स्म?

(ख) व्याघ्रस्य पिपासा कथं शान्ता अभवत्?

(ग) बालः कुत्र विलपिष्यति?

(घ) प्रेमली कस्य पत्नी आसीत्?

**प्र०17. रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत–** **(4)**

(क) <u>गुणाः</u> गुणज्ञेषु गुणाः भवन्ति।

(ख) <u>लुब्धस्य</u> यशः नश्यति।

(ग) <u>मधुमक्षिका</u> माधुर्यमेव जनयति।

(घ) महतां <u>प्रकृतिः</u> सुस्थिरा भवति।

**प्र०18. समानार्थकानि पदानि मेलयत–** **(2)**

| | |
|---|---|
| सलिलम् | कुम्भः |
| गृहम् | शिशुम् |
| घटः | जलम् |
| बालम् | भवनम् |

**प्र०19. मञ्जूषातः अव्ययपदानि चित्वा रिक्तस्थानानि पूरयत–** **(2)**

**मञ्जूषाः–** सदा, विना, तथा, एव

(क) सत्यम् ---------- जयते।

(ख) सः यथा चिन्तयति ---------- आचरति।

(ग) विद्यां ---------- जीवनं वृथा।

(घ) ---------- भगवन्तं भज।

**प्र०20. अधोलिखित तद्भव शब्दानां कृते संस्कृतपदानि लिखत–** **(2)**

कड़वा = ------------------

लोभी = ------------------

मधुमक्खी = ------------------

कंजूस = ------------------